CC-0. In Public Domain. Digitization by eGangotri

सा. २०३० R.

(R)

संस्कृतभाषा-प्रशिक्षणस्य

पाठ्यक्रमः

आ ६६
R.

महेन्द्र-संस्कृत-विश्वविद्यालयः
बेलझुण्डी, दाङ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. 2030 R.

संस्कृतभाषा-प्रशिक्षणस्य

पाठ्यक्रमः

प्रकाशकः

महेन्द्र-संस्कृत-विश्वविद्यालयः

बेल्झुण्डी, दाङ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

R
Acc. 22828 / 22424 OXB.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. २०३०R

संस्कृतभाषाप्रशिक्षणस्य पाठ्यक्रमः

१. उद्देश्यम्

प्रवेशिकां (S.L.C.) तत्समकक्षां परीक्षां वा समुत्तीर्य महेन्द्रसंस्कृत-विश्वविद्यालयस्योत्तरमध्यमस्तरे पिपठिषूणां छात्राणां प्रवेशार्हतायाः संपादनम् ।

२. पाठ्यक्रमपरिचयः

पत्रम्	विषयाः	अङ्काः	पूर्णाङ्काः
प्रथमम्	प्रत्याहार-संज्ञा-सन्धिपरिचयः	२०	१००
	सुबन्तशब्दसिद्धिः	२०	
	शब्दरूपाणि धातुरूपाणि च	२०	
	कारकसमासपरिचयः	२०	
	निबन्धरचना	२०	
द्वितीयम्	संस्कृतवाक्यरचना	२०	१००
	वाक्यपरिवर्तनम्	२०	
	नीतिकथाः	२०	
	नीतिपद्यानि	२०	
	गद्यपद्यपरिचयः	२०	
पूर्णयोगः			२००

३. नियमा :

१. प्रवेशिकां (S.L.C.) तत्समकक्षां परीक्षां समुत्तीर्णास्तत्र प्रविष्टा वा छात्राः संस्कृतभाषाप्रशिक्षणाय प्रवेशार्हा भवन्ति ।

२. संस्कृतभाषाप्रशिक्षणस्य पाठ्यक्रमे पत्रद्वयं विद्यते, तत्र प्रतिपत्रं शतं पूर्णाङ्काः सन्ति निर्धारिताः ।

३. आंशिकपरीक्षाया व्यवस्था संस्कृतभाषाप्रशिक्षणे नास्त्यङ्गीकृता ।

४. संस्कृतभाषाप्रशिक्षणे समुत्तीर्णः छात्र उत्तरमध्यमकक्षायां ज्यौतिषविषये, साहित्यविषये, इतिहासपुराणविषये प्राच्यराज-शास्त्रविषये च भवति प्रवेशार्हः ।

५. संस्कृतभाषाप्रशिक्षणे प्रतिसप्ताहं प्रतिपत्रं पञ्च पाठाः निर्धारिताः । अयं कार्यक्रमः पञ्चमाषावधिको भविष्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतभाषाप्रशिक्षणस्य पाठ्यक्रमः

१. **प्रत्रम्** - प्रथमम्
२. **विषयः** - व्याकरणम्
३. **पाठ्यांशनाम** - संस्कृतव्याकरणं निबन्धरचना च
४. **प्रकरणविभागः** — अङ्काः
   (क) प्रत्याहारसंज्ञासन्धिपरिचयः — २०
   (ख) सुबन्तपदसिद्धिः — २०
   (ग) नामरूपावली धातुरूपावली च — २०
   (घ) कारक-समासज्ञानम् — २०
   (ङ) निबन्धरचना — २०
५. **पाठ्यवस्तुविवरणाम्**

(क) प्रकरणम्-प्रत्याहार-संज्ञा-सन्धिपरिचयः — विंशतिपाठाः

चतुर्दशमाहेश्वरसूत्राणाम्, अज्झलादिप्रत्याहाराणाम्, इत्-प्रत्याहार-लोप-सवर्ण-पद-संयोग-वृद्धि-गुण- धातु-प्रातिपादिकसंज्ञा-विधायकानां संज्ञासूत्राणाम्, यण्-गुण-वृद्धि-दीर्घ-अयादि-पूर्वरूपसन्धिविधायकानाम्, इको यणचि (६।१।७७) एचोऽयवायावः (६।१।७८) वृद्धिरेचि (६।१।८८) अकः संवर्णे दीर्घः (६।१।११०) एङः पदान्तादति (६।१।१०९) इति सूत्राणां सोदाहरणानाम्, श्चुत्व-ष्टुत्व-जश्त्व- छत्व-अनुस्वारसन्धिविधायकानां, स्तोः श्चुना श्चुः (८।४।४०) ष्टुना ष्टुः (८।४।४१) झलां जशोऽन्ते (८।२।३९) मोऽनुस्वारः (८।३।२३) शश्छोऽटि (८।४।६३) इत्येतेषां सोदाहरणानां सूत्राणाम्, विसर्जनीयत्व-सत्व-रुत्व-उत्व-सन्धिविधायकानां, ससजुषो रुः (८।२।६६) खरवसानयोर्विसर्जनीयः (८।३।१५) विसर्जनीयस्य सः (८।२।३४) अतोरोरप्लुतादप्लुते (६।१।११३) हशि च (६।१।११४) इत्येतेषां सोदाहरणानां शिक्षणम् ।

(ख) प्रकरणम् - सुबन्तशब्दसिद्धिः — विंशतिपाठाः

राम-रमा-हरि-भानु-नदी-वधू-पितृशब्दानां फल-वारि-मधुशब्दानाञ्च रूपाणां प्रमुखसूत्रनिर्देशं साधुत्वप्रदर्शनम् । सर्व-तत्-इदं-राजन्-विद्यार्थिन्-श्रीमत्-युवन्शब्दरूपाणां प्रमुखसूत्रनिर्देशं सिद्धिप्रक्रियायाः शिक्षणम् ।

(ग) प्रकरणम् - नामरूपावली, धातुरूपावली च । — विंशतिपाठाः

१. (क) अजन्तानां राम-सीता-कवि-विधु-गौरी-पितृ-ज्ञान-वारि-शब्दानां रूपतालिकाप्रदर्शनं विधाय, अकारान्त-आकारान्त-इकारान्त-उकारान्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋकारान्तानां व्ययहारोपयोगिनां शब्दानां तत्तत्प्रकरणे छात्राभ्यासाय दशाधिकानामुदाहरणतया समुपस्थापनम् ।

(ख) हलन्तानां श्रीमत्-विद्यार्थिन्-युवन्-राजन्-युष्मद्- अस्मद्-इदम्-तत्-वाच्-शब्दानां सर्वनामशब्दातिरिक्तानामन्येषां रूपप्रदर्शनक्रमे व्यवहारोपयोगिनां प्रत्येकं दशाधिकानां दृष्टान्तशब्दानामुपस्थापनम् ।

(ग) सङ्ख्यावाचकानाम्, एक-द्वि-त्रि-चतुःशब्दानां त्रिषु लिङ्गेषु रूपतालिकाप्रदर्शनम् ।

२. (क) भ्वादिगणस्थानां भू-पठ्-स्था-पा-दृशिर्-श्रु-घ्रा-लिख्-गम्लृ-डुपचस्-हस्-रक्ष्-प्रमुखाणां परस्मैपदिनाम्, एध्-भाष्-श्लाघृ-मुद-वृत्प्रमुखाणामात्मनेपदिनाम् भज्-यज्-प्रमुखाणामुभयपदिनां धातूनां रूपतालिकाप्रदर्शदनम् ।

(ख) अदादिगणस्थानाम्, अद-हन्-विद्धातूनां परस्मैपदिनां शीङ्धातोरात्मनेपदिनश्च रूपतालिकाप्रदर्शनम् ।

(ग) जुहोत्यादिगणस्थानां हु-ञिभी-ओहाक्धातूनां परस्मैपदिनां डुधाञ्-डुदाञ्धात्वोरुभयपदिनोश्च रूपतालिकाप्रदर्शनम् ।

(घ) दिवादिगणस्थानां दिवु-नृती-त्रसी-णश-धातूनां रूपतालिकाप्रदर्शनम् ।

(ङ) स्वादिगणस्थयोः चिञ्-वृञ्धात्वोरुमयपदिनो रूपतालिकाप्रदर्शनम् ।

(च) तुदादिगणस्थानां मुच्लृ-षिच्-इषु-टुमस्जो-प्रच्छ-मृङ् धातूनां परस्मैपदिनां रूपतालिकाप्रदर्शनम् ।

(छ) रुधादिगणस्थस्य परस्मैपदिनो भुज्धातोः रूपतालिकाप्रदर्शनम् ।

(ज) तनादिगणस्थस्योभयपदिनो डुकृञ्धातोः रूपतालिकाप्रदर्शनम् ।

(झ) क्रयादिगणस्थयो गृह-बन्धधात्वोः परत्मैपदिनोः डुक्रीञ् धातोरुभय- पदिनश्च रूपताकिाप्रदर्शनम् ।

(ञ) चुरादिगणस्थानां चुर-चिती-चिन्त-मडि-पाल-गणधातूनां रूपतालिकाप्रदर्शनम् ।

(विशेषः- धातुरूपशिक्षणक्रमे लट्-लोट्-लङ्-लृट्लकाराणामेव रूपशिक्षणम्, समानप्रकृतीनामन्येषामपि व्यावहारिकाणां धातूनामपि रूपाणां बोधनम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(घ) **प्रकरणम्-कारकसमासज्ञानम्** विंशतिपाठाः

लिङ्गवचने सोदाहरणं निरूप्य सरलया गिरा ससूत्रनिर्देशं सोदाहरणं ससंबन्धानां कारकाणामुपस्थापनम् । तत्र क्रमे प्रातिपदिकार्थलिङ्ग-परिमाणवचनमात्रे प्रथमा (२।२।४६) संबोधने च (२।३।४७) कर्तुरीप्सिततमं कर्म (१।४।४९) कर्मणि द्वितीया (२।३।२) अकथितञ्च (१।२४५१) स्वतन्त्रः कर्ता (१।४।५४) साधकतमं करणम् (१।४।४२) कर्तृकरणयोस्तृतीया (२।३।१८) कर्मणा यमभिप्रैति स संप्रदानम् (१।४।३२) क्रियया यमभिप्रैति सोऽपि संप्रदानम्, चतुर्थी संप्रदाने (२।३।१३) ध्रुवमपायेऽपादानम् (१।४।२४) अपादाने पञ्चमी (२।३।२८) षष्ठी शेषे (२।३।५२) आधारोऽधिकरणम् (१।४।४५) सप्तम्यधिकरणे च (२।३।३६) इत्येतेषां सोदाहरणशिक्षणम् । समासपरिचयं प्रदाय सोदाहरणमव्ययी-भाव-तत्पुरुष-कर्मधारय-द्विगु-द्वन्द्वसमासानां शिक्षणम् ।

(ङ) **प्रकरणम् निबन्धरचना** विंशतिपाठाः

निवन्धस्य लक्षणम्, निबन्धप्रकाराः, निबन्धस्याङ्गानि, निवन्धलेखविधिः, निवन्धरचनाभ्यासश्च । तत्राधोलिखितविषयमवलम्ब्य निबन्धलेखाभ्यासो विधेयः ।

(१) विद्या (२) परोपकारः (३) उद्योगः (४) वसन्तः (५) जन्मभूमिः (६) हिमालयः (७) सत्सङ्गतिः (८) अनुशासनम् (९) संस्कृतभाषा (१) लोकतन्त्रम् (११) अस्माकं विद्यालयश्च ।

६. **पाठ्यपुस्तके**

१. लघुसिद्धान्तकौमुदी वरदराजकृता

२. संस्कृतव्याकरणप्रवेशिका महेन्द्र-संस्कृत-विश्वविद्यालयः

७. **सहायकग्रन्थाः**

१. अस्माकं संस्कृतव्याकरणम्, केशवशरणोपाध्यायरचितम्, जनक-शिक्षा सामग्री केन्द्र

२. अनुवादचन्द्रिका (संवद्धांशः, तृतीयप्रकाशः) सोमनाथरचिता

३. संस्कृतनिवन्धावलिः वासुदेवद्विवेदिरचितम्

४. सस्कृत-शिक्षणाभ्यासः (प्रथमो भागः) नीलमणिढुङ्गानारचितः महेन्द्र-संस्कृत-विश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१. **पत्रम् – द्वितीयम्**

२. **विषयः – साहित्यम्**

३. **पाठ्यांशविषयाः–** संस्कृतरचना, नीतिकथाः, नीतिपद्यानि गद्यपद्यपरिचयश्च

४. **प्रकरणविभागः** **अङ्काः**

(क) संस्कृतवाक्यरचना २०

(ख) वाक्यपरिवर्तनम् २०

(ग) नीतिकथाः २०

(घ) नीतिपद्यानि २०

(ङ) गद्यपद्यपरिचयः २०

५. **पाठ्यवस्तुविवरणम्**

(क) **प्रकरणम् – संस्कृतवाक्यरचना** **विंशतिपाठाः**

वाक्यपरिचयः, वाक्यभेदाः, वाक्यावयवाः ससंबन्धकारकनियमानुसारं वाक्यरचनाभ्यासः, अनुच्छेदलेखनम् ।

(ख) **प्रकरणम् – वाक्यपरिवर्तनम्** **विंशतिपाठाः**

१. वचनपुरुषकालानुसारेण वाक्यानां मिथः परिवर्तनम्

२. वाच्यपरिवर्तनम्

३. अर्थानुसारेण वाक्यानामन्योन्यं परिवर्तनम् ।

४. रचनादृष्टया वाक्यानां परस्परं परिवर्तनम् ।

५. क्त्वा-ल्यप्-तुमुन्-शतृ-शानच्-प्रत्ययान्तपदैः वाक्यसंश्लेषणम् ।

६. वाक्यविश्लेषणम् ।

(ग) **प्रकरणम् – नीतिकथाः** **विंशतिपाठाः**

अधोलिखितपद्यभागरहितनीतिकथामाध्यमेन रचनाकौशलस्य व्युत्पत्तेश्च संवर्धनम् ।

१. चित्रग्रीवहिरण्यककथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२. वृद्धव्याघ्रलुब्धपथिककथा

३. चित्राङ्गसुबुद्धिक्षुद्रबुद्धिकथा

४. जरद्गवदीर्घकर्णकथा

५. चूडाकर्णवीणाकर्णकथा

६. भैरवव्याधदीर्घरावजम्बूककथा

७. कर्पूरतिलक - जम्बूककथा

(घ) प्रकरणम् - नीतिपद्यानि विंशतिपाठाः

निम्नलिखितपद्याध्ययनमुखेन सरलसंस्कृतनिबद्धकृतीनामास्वादः, वृत्तानुसारेण पद्यानामुच्चारणम्, सान्वयं पद्यानां व्याख्यानम् शब्दानां व्युत्पादनञ्च

पद्यानि -

१. आर्यायाम् - अज्ञः सुखमाराध्य ० दानं भोगो नाश ० अप्रियवचन ० यदचेतनो ० सिंहः शिशुरपि ०

२. अनुष्टुभि - दुष्टा भार्या ० शैले शैले ० अधमा धन ० रङ्कः करोति ० क्षीयन्ते ० अजरामरवत् ० विद्या ददाति ० यौवनं ० पुण्यतीर्थे ० को धन्यो ० ऋणकर्ता ० यथा ह्येकेन ० काकतालीय ० मुर्खोऽपि ० माता शत्रु ० काव्यशास्त्र ० इज्याध्ययन ० दरिद्रान् ० नदीनां ० आपदर्थे ० निर्गुणेष्वपि ० न कश्चित् ० यदशक्यं ० अयं निज ० दुर्जनः परि ० मनस्यन्यद् ० परोपदेशे ० यस्यार्थास्तस्य ० तेनाधीतं ० वृत्यर्थं नाति ० अमित्रं कुरुते ० एकं हन्यात् ० षण्णामात्मनि ० शीलप्रधानं ० सुवर्णपुष्पाम् ० सुलभाः पुरुषाः ० न विश्वसेदविश्वस्ते ० धृतिः शमो ० अकीर्तिं विनयो ०

३. इन्द्रवज्रायाम् - सर्वौषधीनां ०

४. उपेन्द्रवज्रायाम् - न निर्मितः०

५. उपजात्याम् - अर्थागमो ० यस्यास्ति वित्तम् ० आरम्भगुर्वी ० रत्नैर्महार्हे ० असंभवं हेममृगस्य ०

६. वंशस्थे - वरं वनं ० धनेन किं यो ० पिबन्ति नद्यः० सुजीर्णमन्नं ० भवन्ति नम्राः०

७. वसन्ततिलकायाम्- जाड्यं धियो ० प्रारभ्यते ० पापान्निवारयति ० निन्दन्तु नीतिनिपुणाः ० प्राक् पादयोः०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. मालिन्याम् - स हि गगन ० नरपतिहितकर्ता ० उदयति यदि भानुः० शशिनि खलु कलङ्कः०

९. मन्दाक्रान्तायाम् - घृष्टं घृष्टं ० मौनान्मूक ० धूमज्योति ०

१०. शिखरिण्याम् - यदा किञ्चिदज्ञो ०

११. शार्दूलविक्रीडिते - शक्यो वारयितुं ० विद्या नाम नरस्य ० क्षान्तिश्चेदनलेन ०

१२. सग्धरायाम् - सन्मार्गे तावदास्ते ०

(ङ) प्रकरणम् - गद्यपद्यपरिचयः विंशतिपाठाः

१. गद्यस्य लक्षणम्, तद्भेदाः, तेषामुदाहरणानि च

२. पद्यस्य लक्षणम्, तद्भेदाः, छन्दपरिचयः, छन्दोभेदाः, मात्रागणयतिपरिचयः, निम्नछन्दसां सोदाहरणं लक्षणानि

(१) आर्या (२) अनुष्टुव् (३) इन्द्रवज्रा (४) उपेन्द्रवज्रा (५) उपजातिः (६) वंशस्थः (७) वसन्तलिका (८) मालिनी (९) शिखरिणी (१) मन्दाक्रान्ता (११) शार्दूलविक्रीडितम् (१२) सग्धरा च ।

६. पाठ्यपुस्तकानि

१. हितोपदेशः (मित्रलाभस्य संबद्धांशः) विष्णुशर्मरचितः

२. नीतिशतकम् (संबद्धपद्यानि) भतृहरिरचितम्

३. विदुरनीतिः (संबद्धश्लोकाः)

४. छन्दोमञ्जरी (संबद्धांशः)

५. अनुवादचन्द्रिका (प्रथम प्रकाशः) सोमनाथसिग्द्यालरचिता

६. संस्कृतसाहित्यपरिचयः, म.सं.वि.

७. सहायकग्रन्थाः

१. क - ख प्रकरणयोः कृते

संस्कृत-शिक्षणाभ्यासः (प्रथमो भागः) नीलमणिढुङ्गानारचितः

२. ग - घ - ङ प्रकरणानां कृते

संस्कृतशिक्षणाभ्यासः (द्वितीयो भागः) नीलमणिढुङ्गानारचितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Acc. 22828/22424

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा
२०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu